# विभक्तिः अभ्यासपत्राणि

## २५ – ०२.०७.२०१६

## व्योम-संस्कृत-पाठशाला

## www.sanskritfromhome.in

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - १

- भुवनम् – भूखण्डाः - देशाः – राज्यानि – नगर्यः – प्रदेशाः – गृहाणि – जनाः
- ग्रामः – क्षेत्राणि – वृक्षाः – फलानि – बीजानि
- नगरम् – उद्यानानि – लताः – पुष्पाणि – मकरन्दम्
- भारतम् – नद्यः – जलम् – मीनाः
- पत्तनानि – शालाः – प्रकोष्ठाः – छात्राः
- नगरी – ग्रन्थालयाः – पुस्तकानि – चित्राणि - वर्णाः

# अभ्यासः – १ - उत्तराणि

- भुवने भूखण्डाः सन्ति। भूखण्डेषु देशाः सन्ति। देशेषु राज्यानि सन्ति। राज्येषु नगर्यः सन्ति। नगरीषु प्रदेशाः सन्ति। प्रदेशेषु गृहाणि सन्ति। गृहेषु जनाः सन्ति।
- ग्रामे क्षेत्राणि सन्ति। क्षेत्रेषु वृक्षाः सन्ति। वृक्षेषु फलानि सन्ति। फलेषु बीजानि सन्ति।
- नगरे उद्यानानि सन्ति। उद्यानेषु लताः सन्ति। लतासु पुष्पाणि सन्ति। पुष्पेषु मकरन्दम् अस्ति।
- भारते नद्यः सन्ति। नदीषु जलम् अस्ति। जले मीनाः सन्ति।
- पत्तनेषु शालाः सन्ति। शालासु प्रकोष्ठाः सन्ति। प्रकोष्ठेषु छात्राः सन्ति।
- नगर्यां ग्रन्थालयाः सन्ति। नगरीषु पुस्तकानि सन्ति। पुस्तकेषु चित्राणि सन्ति। चित्रेषु वर्णाः सन्ति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – २ - द्विवचनवाक्यानि

- (हस्त) फलम् अस्ति।
- (पाद) व्रणः अस्ति।
- वार्ता (कर्ण) पतति।
- (नेत्र) दृष्टिः नास्ति।
- (घट) जलं पूर्णम् अस्ति।
- (गृह) जनाः न सन्ति।
- (कपाटिका) वस्त्राणि सन्ति।
- (नदी) जलं नास्ति।
- (कूपी) क्षीरं पूरय।
- (पत्रिका) वार्ताः भीकराः सन्ति।
- (शाला) छात्राः पठन्ति।
- (लेखनी) मशी नास्ति।

# अभ्यासः – २ - उत्तराणि

- हस्तयोः फलम् अस्ति।
- पादयोः व्रणः अस्ति।
- वार्ता कर्णयोः पतति।
- नेत्रयोः दृष्टिः नास्ति।
- घटयोः जलं पूर्णम् अस्ति।
- गृहयोः जनाः न सन्ति।
- कपाटिकयोः वस्त्राणि सन्ति।
- नद्योः जलं नास्ति।
- कूप्योः क्षीरं पूरय।
- पत्रिकयोः वार्ताः भीकराः सन्ति।
- शालयोः छात्राः पठन्ति।
- लेखन्योः मशी नास्ति।

# अभ्यासः – ३ - बहुवचनवाक्यानि

- सिंहाः कुत्र वसन्ति?
- पक्षिणः कुत्र वसन्ति?
- मीनाः कुत्र वसन्ति?
- कृषिकाः कुत्र वसन्ति?
- फलानि कुत्र भवन्ति?
- पुष्पाणि कुत्र भवन्ति?
- छात्राः कुत्र पठन्ति?
- जनाः कुत्र वसन्ति?
- धेनवः कुत्र वसन्ति?
- कथाः कुत्र भवन्ति?
- नाटकानि कुत्र प्रदर्शितानि भवन्ति?
- जलं कुत्र भवति?

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ३ - उत्तराणि

- सिंहाः कुत्र वसन्ति? वनेषु/गुहासु
- पक्षिणः कुत्र वसन्ति? वृक्षेषु/नीडेषु
- मीनाः कुत्र वसन्ति? जले/नदीषु/समुद्रेषु
- कृषिकाः कुत्र वसन्ति? ग्रामेषु
- फलानि कुत्र भवन्ति? वृक्षेषु
- पुष्पाणि कुत्र भवन्ति? लतासु
- छात्राः कुत्र पठन्ति? शालासु/विद्यालयेषु
- जनाः कुत्र वसन्ति? नगरेषु/ग्रामेषु/गृहेषु
- धेनवः कुत्र वसन्ति? गोष्ठेषु
- कथाः कुत्र भवन्ति? पुस्तकेषु
- नाटकानि कुत्र प्रदर्शितानि भवन्ति? रङ्गमन्दिरेषु
- जलं कुत्र भवति? नदीषु/समुद्रेषु

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ४

# बालस्य कस्मिन् आसक्तिः अस्ति?




व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ४ - उत्तराणि

- बालस्य अध्ययने आसक्तिः अस्ति।
- बालस्य क्रीडासु आसक्तिः अस्ति।
- बालस्य चलच्चित्रेषु आसक्तिः अस्ति।
- बालस्य चित्रकलासु आसक्तिः अस्ति।
- बालस्य पाके आसक्तिः अस्ति।
- बालस्य कथासु आसक्तिः अस्ति।
- बालस्य संस्कृते आसक्तिः अस्ति।
- बालस्य सङ्गीते आसक्तिः अस्ति।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ५

## कस्मिन् भक्तिः?



# अभ्यासः – ५ - उत्तराणि

- नारायणे भक्तिः ।
- रमायां भक्तिः ।
- परमेश्वरे भक्तिः ।
- भगवत्यां भक्तिः ।
- गणेशे भक्तिः ।
- गङ्गायां भक्तिः ।
- सरस्वत्यां भक्तिः ।
- आचार्येषु भक्तिः ।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - ६

| अर्जुनस्य | दुर्योधनस्य |
|---|---|
| श्रीकृष्णः – भक्तिः | पाण्डवाः – द्वेषः |
| युधिष्ठिरः – गौरवम् | कर्णः – स्नेहः |
| द्रौपदी – प्रीतिः | मातुलः – विश्वासः |
| सहोदराः – वात्सल्यम् | धर्मः – तिरस्कारः |
| प्रजाः – कारुण्यम् | ज्येष्ठाः – अनादरः |
| धर्मः - श्रद्धा | राज्यम् - मोहः |

# अभ्यासः – ६ - उत्तराणि

| अर्जुनस्य | दुर्योधनस्य |
|---|---|
| श्रीकृष्णे भक्तिः | पाण्डवेषु द्वेषः |
| युधिष्ठिरे गौरवम् | कर्णे स्नेहः |
| द्रौपद्यां प्रीतिः | मातुले विश्वासः |
| सहोदरेषु वात्सल्यम् | धर्मे तिरस्कारः |
| प्रजासु कारुण्यम् | ज्येष्ठेषु अनादरः |
| धर्मे श्रद्धा | राज्ये मोहः |

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ७

# कस्मिन् प्रीतिः अस्ति?




व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ७ - उत्तराणि

- तस्मिन् प्रीतिः ।
- एतस्यां प्रीतिः ।
- मयि प्रीतिः ।
- तस्मिन् प्रीतिः ।
- तस्यां प्रीतिः ।
- एतस्मिन् प्रीतिः ।
- त्वयि प्रीतिः ।
- एतस्मिन् प्रीतिः ।

# अभ्यासः - ८

- एतत् गृहम्। ________ __________ पञ्च जनाः सन्ति।
- सः पर्वतः। ________ __________ घोरं वनम् अस्ति।
- एषा नदी। ________ __________ स्नानं पुण्यप्रदं भवति।
- ताः द्रोण्यः। ________ __________ जलं पूरय।
- एते छात्राः। ________ __________ गुरुभक्तिः अस्ति।
- वयं भारतीयाः। ___________ राष्ट्रनिष्ठा भवेत्।
- यूयां मित्राणि। __________ मम प्रीतिः अस्ति।
- तौ मातापितरौ। __________ सर्वदा गौरवं भवतु।

# अभ्यासः – ८ - उत्तराणि

- एतत् गृहम्। **एतस्मिन् गृहे** पञ्च जनाः सन्ति।
- सः पर्वतः। **तस्मिन् पर्वते** घोरं वनम् अस्ति।
- एषा नदी। **एतस्यां नद्यां** स्नानं पुण्यप्रदं भवति।
- ताः द्रोण्यः। **तासु द्रोणीषु** जलं पूरय।
- एते छात्राः। **एतेषु छात्रेषु** गुरुभक्तिः अस्ति।
- वयं भारतीयाः। **अस्मासु** राष्ट्रनिष्ठा भवेत्।
- यूयां मित्राणि। **युष्मासु** मम प्रीतिः अस्ति।
- तौ मातापितरौ। **तयोः** सर्वदा गौरवं भवतु।

# अभ्यासः - ९

- (काव्यम्) नाटकं रम्यम्।
- (नाटकम्) शाकुन्तलं श्रेष्ठम्।
- (यानम्) विमानं शीघ्रम्।
- (फलम्) आम्रफलं मम प्रियम्।
- (पुष्पम्) कमलं सुन्दरम्।
- (मित्रम्) रमेशः आप्तः।
- (पर्वतः) हिमालयः अत्युन्नतः।
- (छात्रः) शङ्करः चतुरः।
- (अवतारः) मत्स्यः प्रथमः।
- (पुत्रः) माधवः कनिष्ठः।
- (पाण्डवः) भीमः बलिष्ठः।
- (राक्षसः) रावणः क्रूरः।

# अभ्यासः – ९ - उत्तराणि

- काव्यानां/काव्येषु नाटकं रम्यम्।
- नाटकानां/नाटकेषु शाकुन्तलं श्रेष्ठम्।
- यानानां/यानेषु विमानं शीघ्रम्।
- फलानां/फलेषु आम्रफलं मम प्रियम्।
- पुष्पाणां/पुष्पेषु कमलं सुन्दरम्।
- मित्राणां/मित्रेषु रमेशः आप्तः।
- पर्वतानां/पर्वतेषु हिमालयः अत्युन्नतः।
- छात्राणां/छात्रेषु शङ्करः चतुरः।
- अवताराणाम्/अवतारेषु मत्स्यः प्रथमः।
- पुत्राणां/पुत्रेषु माधवः कनिष्ठः।
- पाण्डवानां/पाण्डवेषु भीमः बलिष्ठः।
- राक्षसानां/राक्षसेषु रावणः क्रूरः।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः - १०

- (भाषा) संस्कृतभाषा मधुरा।
- (तारा) अश्विनी आद्या।
- (बालिका) गिरिजा कुशला।
- (पत्रिका) सुधर्मा मम प्रिया।
- दक्षिणभारतस्य (नदी) कावेरी दीर्घा।
- (पत्नी) कैकेयी दशरथस्य प्रियतमा।

# अभ्यासः – १० - उत्तराणि

- भाषाणां/भाषासु संस्कृतभाषा मधुरा।
- ताराणां/तारासु अश्विनी आद्या।
- बालिकानां/बालिकासु गिरिजा कुशला।
- पत्रिकाणां/पत्रिकासु सुधर्मा मम प्रिया।
- दक्षिणभारतस्य नदीनां/नदीषु कावेरी दीर्घा।
- पत्नीनां/पत्नीषु कैकेयी दशरथस्य प्रियतमा।

# अभ्यासः - ११

- रामः गतः। ______ ________ दशरथः प्राणान् त्यक्तवान्।
- पुत्री आगता। _______ ________ पितरौ बहु सन्तुष्टौ।
- काली प्रसन्ना। ______ _______ भक्तः वरम् प्राप्तवान्।
- पितरौ सुप्तौ। _______ ________ पुत्रः गृहात् बहिः गतवान्।
- कृष्णः दृष्टः। _______ ________ जनाः मुक्तिं प्राप्नुवन्ति।
- अध्यापिका आगता। _______ _______ छात्राः तूष्णीम् अभवन्।

व्योम-संस्कृत-पाठशाला ©2016। www.sanskritfromhome.in | www.vyomalabs.in |

# अभ्यासः – ११ - उत्तराणि

- रामः गतः। रामे गते दशरथः प्राणान् त्यक्तवान्।
- पुत्री आगता। पुत्र्याम् आगतायां पितरौ बहु सन्तुष्टौ।
- काली प्रसन्ना। काल्यां प्रसन्नायां भक्तः वरं प्राप्तवान्।
- पितरौ सुप्तौ। पित्रोः सुप्तयोः पुत्रः गृहात् बहिः गतवान्।
- कृष्णः दृष्टः। कृष्णे दृष्टे जनाः मुक्तिं प्राप्नुवन्ति।
- अध्यापिका आगता। अध्यापिकायाम् आगतायां छात्राः तूष्णीम् अभवन्।